**नवमः पाठः**

# राष्ट्रं संरक्ष्यमेव हि

**पाठ-परिचयः**

प्रस्तुतोऽयं पाठः महाभारतकथामाघृत्यसंगृहीतः। एकस्मिन् विद्यालये बालचरशिविरो ऽस्ति। अस्मिन् शिविरे सायंकाले ध्रुवः सिद्धार्थः सुश्रुतचरकौ च परस्परं संवाद माध्यमेन स्वकीयमनुभवं श्रावयन्ति। ध्रुवः स्वकीयं अनुभवं प्रकटयन् कथयति यत् लोकोऽयं अतीव विचित्रः यतोहि केचित् महात्मा गाँधि सदृशाः महापुरुषाः अहिंसायाः पाठं पाठयन्ति, किन्तु केचित् अन्ये राष्ट्रसंरक्षार्थं आणविकास्त्रनिर्माण माध्यमेन लोकविनाशं कर्तुमिच्छन्ति। अस्य प्रतिवादे सिद्धार्थः स्वमतं प्रकटयन् कथयति यत् वस्तुतः विज्ञान-सदुपयोगः राष्ट्रकल्याणाय दुरुपयोगश्च विनाशाय भवति। सुश्रुतोऽपि सिद्धार्थमतं स्वीकारोति, तदनन्तरं चरकः स्वमतं प्रकटयन् वदति यत् पुरा आणविकास्त्र प्रयोगः वर्जितः आसीत्। ध्रुवः पृच्छति यत् किं पुरा ईदृशानि अस्त्राणि आसन् येषां मानवानामुपरि प्रयोगः वर्जितासीत्। चरकानुसारं प्रत्यक्षं किं प्रमाणम्। राष्ट्रं संरक्ष्यमेव हि पाठं पठित्वा स्पष्टो भविष्यति यत् राष्ट्रं सदैव रक्षणीयमस्ति।

**नाट्यांशाधारिताः अनुच्छेदाः**

१. श्रीकृष्णः भो धर्मराजः। समीचीन न कृतम् भवता। पुत्रशैंकविह्वलः भीमसेन एकाकी एव द्रौणिं हन्तुम् अभिधावति।

युधिष्ठिर- भगवन्। सः तु एकाकी एव द्रोणपुत्राय अलम्।

श्रीकृष्ण- वत्स। न जानाति भवान् द्रौणेः चपलां प्रकृतिं पितुः द्रोणात् प्राप्तं ब्रह्मशिरोनाम अस्त्रं विद्यते तस्य पार्श्वे। यदि तत् प्रयुज्येत, सर्वा पृथ्वी दग्धा स्तात्।

युधिष्ठिर- अप्येवम्। आचायाण कीदृशः अनर्थः कृतः। किं चपलंबालकेभ्यः एतादृश-भीषणानाम् अस्त्राणां प्रदानम् उचितम्?

श्रीकृष्ण- श्रृणु तावत्, आचार्येण तु प्रियशिष्याय अर्जुनाय एव प्रीत्या मनसा ब्रह्मास्त्र शिक्षा प्रदत्ता, किन्तु पुत्र प्रेमपराधीनेन तेन अश्वत्थामा अपि तच्छिक्षया वञ्चितः न कृतः।

(क) एकपदेन उत्तरत-

(i) द्रौणिं हन्तुं कः अभिधावति?

(ii) ब्रह्मशिरो नाम अस्त्रं कस्य पार्श्वे विद्यते?

(iii) कस्य चपला प्रकृतिः आसीत्?

(iv) आचार्यः द्रोणः प्रीत्या कस्मै ब्रह्मास्त्र शिक्षां अयच्छत्?

(ख) पूर्णवाक्येन उत्तरत-

(i) कस्मात् सर्वा पृथ्वी दग्धा स्यात्?

(ii) आचार्येण स्वपुत्राय ब्रह्मास्त्रशिक्षा केन कारणेन प्रदत्ता?

(iii) आचार्येण कीदृशः अनर्थः कृतः?

(iv) युधिष्ठिरः किम् उचितं न मन्यते?

(ग) निदेशानुसारम् उत्तरत-

(i) उचितम् पदस्य पर्यायपदं चित्वा लिखत।

(ii) चपलां कस्य पदस्य विशेषणम्?

(iii) सःतु एकाकी द्रोणपुत्राय अलम् अत्र सः सर्वनामपदं कस्मै प्रदत्तम्?

(iv) अस्ति इति स्थाने किं पदं अत्र प्रयुक्तम्?

(v) हन्तुम् पदे मूलधातुः कः?

(vi) प्रीत्या पदे का विभक्तिः?

**गद्यांश (नाट्यांशानुच्छेदः)**

युधिष्ठिर- सम्प्रति आश्वस्तः अस्मि। मन्ये सः ब्रह्मास्त्रप्रयोगं न करिष्यति।

श्रीकृष्ण- तर्हि न जानासि तस्य मनोवृत्तिम्। पितुः उपदेशेन असन्तुष्टः सः एकदा द्वारकापुरीम् आगच्छत्।

युधिष्ठिर- (साश्चर्यम्) कथं चक्रम् इति।

श्रीकृष्ण- आम्! मया कथितं नाहं त्वन्तः ब्रह्मास्त्रम् इच्छामि। यदि त्वं मम गदां, शक्तिं धनुः चक्रं वा इच्छसि तुभ्यं ददामि।

युधिष्ठिर- ततस्ततः।

श्रीकृष्ण- स तु चक्रम् एव अचायत। गृहाण चक्रम्। इति उक्तः सः सव्येन पाणिना चक्रम् गृहीतवान् किन्तु सः तत् चक्रं स्वस्थानात् संचालयितुम् अपि समर्थः न अभवत्।

१. एकपदेन उत्तरत-

(i) युधिष्ठिरः कस्य मनोवृत्तिः न जानाति?

(ii) अश्वत्थामा किं वाञ्छति स्म?

(iii) द्रोणपुत्रः एकदा कुत्र गतवान्?

(iv) कः चक्रं संचालयितुम असमर्थः अभवत्?

२. पूर्णवाक्येन उत्तरत-

श्रीकृष्णः द्रोणपुत्राय किम् अयच्छत्?

३. निर्देशानुसारम् उत्तरत-

(i) एकस्मिन् समये इत्यर्थे किम् अव्ययपदम् अत्र प्रयुक्तम्?

(ii) 'आश्चर्येण सहित' इति स्थाने किं पदं प्रयुक्त?

(iii) 'सव्येन पाणिना' अनयोः पदयोः विशेषणपदं किम्?

(iv) अवगच्छामि इति पदस्य पर्यायं चित्वा लिखत?

**(घ) उचितैः पदैः भावम् पूरयत-**

१. परमापद्गतेनापि नैव तात त्वया रणे।
इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः।।

भाव- द्रोणाचार्यः स्वपुत्रं बोधयति यत --------। परमापन्तौ अपि इदं -------- त्वया रणे विशेषतः -------- कदापि न प्रयोक्तव्यम्।

२. अस्त्रं ब्रह्मशिरो यत्र परमास्त्रेण वध्यते।
समाः द्वादश पर्यन्यस्तद् राष्ट्रं नाभिवर्षति।।

भाव- अस्य भावः अस्ति यत् यत्र ब्रह्मशिरो नाम अस्त्रम् -------- वध्यते तदराष्ट्रम् -------- द्वादश वर्षाणि यावत् न --------।

३. समुचितैः पदैः अन्वयः पूरयत-

(i) अस्त्रं ब्रह्मशिरो यत्र परमास्त्रेण वध्यते।
समाः द्वादशपर्यन्यस्तद् राष्ट्रं नाभिवर्षति।।

अन्वय- यत्र -------- अस्त्रं परमास्त्रेण -------- तत् राष्ट्रं -------- द्वादश न अभि वर्षति।

(ii) नानाशस्त्रविदः पूर्वे येऽप्यतीता महारथाः।
नैतदस्त्रं मनुष्येषु तैः प्रयुक्तं कथञ्चन।।

अन्वय- नानाशास्त्रविदः ये अपि -------- पूर्वे अतीताः तैः अपि -------- एतत् अस्त्रं कथञ्जन न --------।

(iii) परमापद्गतेनापि नैव तात त्वया रणे।

इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः।।

अन्वय- तात। परमापद्गतेन अपि -------- त्वया इदम् -------- विशेषतः ------- न प्रयोक्तव्यम्।

४. शब्दार्थमेलनं कुरुत-

| | |
|---|---|
| (i) समीचीनम् | कथयामि |
| (ii) मुञ्च | सूर्यः |
| (iii) सहस्रांशुः | ज्ञात्वा |
| (iv) विज्ञाय | मनसि |
| (v) ब्रीमि | उचितम् |